नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 19

# VU—33–2—Sahit. Shas. II

No. of Printed Pages — 3

# वरिष्ठ उपाध्याय परीक्षा, 2011

## साहित्यशास्त्रम्

## द्वितीयपत्रम्

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथमप्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येकं भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरम् उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयम् ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) मेघदूतानुसारं यक्षेश्वराणां नगरी वर्तते —
   (अ) विशाला (ब) अलका (स) अमरावती (द) अयोध्या । 1
   (ii) देवगिरिपर्वते निवसति —
   (अ) स्कन्दः (ब) शिवः (स) कुबेरः (द) यक्षः । 1
   (iii) सज्जनानां मैत्री सङ्गतिर्वा भवति —
   (अ) स्वार्थसिद्धिद्वारेण (ब) साप्तपदीसङ्गतेन
   (स) समधिकधनसञ्चयेन (द) तपश्चरणेन । 1
   (iv) मगणस्योदाहरणमस्ति —
   (अ) तनय (ब) शालिनी (स) शरीर (द) विश्रान्तः । 1
2. उत्तमानां सम्पदः किं विधाः भवन्ति ? 1
3. सुखिनः जनस्यापि चित्तं कदा अन्यथावृत्ति भवति ? 1
4. पार्वती तपश्चरणाय कुत्र गता ? 1
5. तपसि पर्णाशनत्यागेन पार्वत्याः नाम किं जातम् ? 1
6. ''तामद्य'' इत्यत्र को नाम गणोऽस्ति ? 1
7. आशाबन्धः किं करोति ? $1\frac{1}{2}$
8. कीदृशः यक्षः रामगिर्याश्रमेषु निवासं चकार ? $1\frac{1}{2}$
9. मेघदूतानुसारं मेघः केषां पदार्थानां सन्निपातः वर्तते ? $1\frac{1}{2}$
10. शिवस्याट्टहासेन कः उपमितः ? $1\frac{1}{2}$
11. रामगिर्याश्रमाणां वैशिष्ट्यं स्वसंस्कृतेन वर्णनीयम् । 2
12. महाकवेः कालिदासस्य काव्यवैशिष्ट्यं प्रतिपादनीयम् । 4
13. ''मन्दायन्ते न खलु सुहृदामभ्युपेतार्थ कृत्याः'' सूक्तेः सप्रसंगं भावो लेख्यः । 2
14. ब्रह्मचारिणा शिवस्य के के दोषाः समुद्घाटिता ? 2
15. वृत्तं कतिविधं ? अर्धसमवृत्तलक्षणं लिखत । 2
16. सप्रसङ्गान्वयछन्दोऽलंकारपूर्वकं व्याख्या कार्या : $2 \times (1 + \frac{1}{2} + \frac{1}{2} + \frac{1}{2} + 3) = 11$

(अ) त्वामासारप्रशमित-वनोपप्लवं साधु मूर्ध्ना,
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय,
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥

**अथवा**

वेणीभूतप्रतनुसलिलासाबतीतस्य सिन्धुः,
पाण्डुच्छाया तटरुहतरुभ्रंशिभिजीर्णपर्णैः ।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती,
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥

(ब) तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी,
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ,
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥

**अथवा**

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं,
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वं ।
ताभ्यो मोक्षस्तव यदि सखे धर्मलब्धस्य न स्यात् ,
क्रीडा लोला: श्रवणपरुषैर्गर्जितैर्भाययेस्ता: ॥

17. निम्नाङ्कितेषु यथेष्टं **द्वयो:** श्लोकयो: सप्रसंगं भावार्थो लेख्य: — $2 \times (1 + 3) = 8$

(अ) तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि:,
जम्बूकुंजप्रतिहतरयं तोयमादाय गच्छे: ।
अन्त:सारं घन तुलयितुं नानिल: शक्ष्यति त्वां,
रिक्त: सर्वो भवति लघु: पूर्णता गौरवाय ॥

(ब) तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां,
जह्नो: कन्यां सगरतनयस्वर्गसोपानपंक्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनै:
शम्भो: केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥

(स) तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां,
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या व: काले वहति सलिलोद्गारमुच्चैर्विमाना,
मुक्ताजालग्रथितमलकं कामिनी याभ्रवृन्दम् ॥

18. प्रसङ्गान्वयछन्दोऽलंकारपूर्वकं व्याख्या विधेया — $2 \times \left(\frac{1}{2} + \frac{1}{2} + \frac{1}{2} + \frac{1}{2} + 2\right) = 8$

(अ) मनीषिता: सन्ति गृहेषु देवता -
स्तप: क्व वत्से क्व च तावकं वपु: ।
पदं सहेत भ्रमरस्य पेलवं,
शिरीषपुष्पं न पुन: पतत्रिण: ॥

**अथवा**

शुचौ चतुर्णां ज्वलतां हविर्भुजां,
शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभा-
मनन्यदृष्टि: सवितारमैक्षत ॥

(ब) मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्र शोभिना ।
तुषारवृष्टि-क्षत-पद्म-सम्पदां
सरोज-सन्धानमिवाकरोदपाम् ॥

**अथवा**

दिवं यदि प्रार्थयसे वृथा श्रम:
पितु: प्रदेशास्तव देवभूमय: ।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ॥

19. निम्नलिखितेषु छन्द:सु यथेष्टं **द्वयो:** गणप्रदर्शनपूर्वकं लक्षणोदाहरणानि लेख्यानि — $2 \times (1 + 1 + 1) = 6$

(अ) मंजुभाषिणी (ब) शालिनी (स) चन्द्रलेखा ।